# Shri Ranganatha Stotram

# શ્રીરઙ્ગનાથસ્તોત્રમ્

## Document Information

Text title : Ranganatha Stotram 3

File name : ranganAthastotram3.itx

Category : vishhnu, suprabhAta

Location : doc_vishhnu

Proofread by : Aruna Narayanan

Latest update : March 26, 2024

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 26, 2024

*sanskritdocuments.org*

Shri Ranganatha Stotram

# શ્રીરઙ્ગનાથસ્તોત્રમ્

નમઃ શ્રીરઙ્ગનાથાય નમઃ શ્રીરઙ્ગશાયિને ।
નમઃ શ્રીરઙ્ગદેવાય શ્રી શ્રીનિવાસાય તે નમઃ ॥ ૧॥

નમો ભગવતે તુભ્યં વાસુદેવાય તે નમઃ ।
સઙ્કર્ષણાય પ્રદ્યુમ્નાય અનિરુદ્ધાય તે નમઃ ॥ ૨॥

પુરુષાય નમસ્તુભ્યં અચ્યુતાય પરાય ચ ।
વાસુદેવાય તારાય નમઃ શ્રીરઙ્ગશાયિને ॥ ૩॥

કેશવાય નમસ્તેઽસ્તુ નમો નારાયણાય ચ ।
માધવાય નમસ્તુભ્યં ગોવિન્દાય ચ તે નમઃ ॥ ૪॥

ૐ નમો વિષ્ણવે દેવ મધુસૂદન તે નમઃ ।
ત્રિવિક્રમ નમસ્તેઽસ્તુ નમસ્તે વામનાય ચ ॥ ૫॥

શ્રીધરાય નમસ્તુભ્યં હૃષીકેશ નમોઽસ્તુ તે ।
નમોઽસ્તુ પદ્મનાભાય નમો દામોદરાય ચ ॥ ૬॥

મત્સ્યકૂર્મવરાહાય હંસાશ્વશિરસે નમઃ ।
નમોઽસ્તુ જામદગ્ન્યાય દત્તાય કપિલાય ચ ॥ ૭॥

વેદવ્યાસાય બુદ્ધાય નૃસિંહાય તે નમઃ ।
રામલક્ષ્મણશત્રુઘ્નભરતાત્મન્ નમોઽસ્તુ તે ॥ ૮॥

કૃષ્ણાય બલભદ્રાય નમસ્સામ્ભાય કલ્કિને ।
અનન્તાનન્દશયને પુરાણ પુરુષોત્તમ
રઙ્ગનાથ જગન્નાથ નાથ તુભ્યં નમો નમઃ ॥ ૯॥

ઇતિ શ્રીરઙ્ગનાથસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Ranganatha Stotram*

pdf was typeset on March 26, 2024

Please send corrections to *sanskrit@cheerful.com*